
# पञ्चमः अभ्यासः

# सङ्ख्या



मम विद्यालयः दिल्ली महानगरस्य **एकः** आदर्शः विद्यालयः अस्ति। अस्मिन् विद्यालये **एकं** प्रमुखं प्रवेशद्वारम् अस्ति। एतत् सिंहद्वारम् कथ्यते, **त्रीणि** च सहायकानि द्वाराणि सन्ति। **चत्वारि** द्वाराणि केवलं छात्राणां गमनागमनकाले एव अनावृतानि भवन्ति। अस्माकं विद्यालये **एकः** सुयोग्यः प्रधानाचार्यः **द्वौ** च तस्य सहायकौ उपप्रधानाचार्यौ स्तः। विविधविषयाणां **शताधिकाः** शिक्षकाः सन्ति। छात्राणां सङ्ख्या **द्विसहस्त्राधिका** विद्यते। अत्र **तिस्त्रः** विज्ञानप्रयोगशालाः **एका** च सङ्गणकप्रयोगशाला अस्ति। एवं समस्तानां प्रयोगशालानां सङ्ख्या **चतस्त्रः** अस्ति। भाषाणां कृते अपि **त्रयः** पृथक् विभागाः सन्ति। **त्रिषु** अपि विभागेषु अनुभविनः शिक्षकाः सन्ति। अयं विद्यालयः **द्वादशकक्षापर्यन्तः** अस्ति। कतिपयासु कक्षासु पञ्च कतिपयासु च **सप्त** अनुभागाः सन्ति। प्रति अनुभागं **पञ्चाशत्** छात्राः सन्ति। **एकादशी-द्वादशी** च कक्षा **त्रिषु** विभागेषु विभक्ता अस्ति। तत्र विज्ञान-विभागः वाणिज्य-विभागः कला-विभागः च। अस्मिन् विद्यालये **द्वे** क्रीडाक्षेत्रे स्तः। **एकं** वरिष्ठेभ्यः छात्रेभ्यः **द्वितीयं** च कनिष्ठेभ्यः वर्तते। विद्यालयस्य परिसरे **त्रीणि** उद्यानानि सन्ति। **एकस्मिन्** पाटलपुष्पाणां बाहुल्यं विद्यते। **द्वयोः** च अन्येषां कुसुमानाम्। प्रत्येकम् उद्यानेषु हरितदूर्वायाः हरीतिमा जनानां मनांसि हरति। कार्यालये **त्रयः** लिपिकाः एकश्च कार्यालयस्य अधीक्षकः अस्ति। अधीक्षकेण सर्वकार्यं **त्रिषु** लिपिकेषु विभक्तं कृतम्। कार्यालयस्य **चत्वारः** लिपिकाः परस्परं सहयोगेन कार्यं कुर्वन्ति। अत एव अयं विद्यालयः अहर्निशम् उन्नतिपथं गच्छति।

**(क) उपरिप्रदत्त-अनुच्छेदात् स्थूलाक्षरैः मुद्रितानि सङ्ख्यावाचकानि पदानि चित्वा लिङ्गानुसारं पृथक्-पृथक् तालिकासु लिखत -**

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... |

### नियमाः

- सङ्ख्यावाचकाः शब्दाः विशेषणानि भवन्ति।
- सङ्ख्याशब्देषु एकतः प्रारभ्य चतुर्-सङ्ख्या-वाचकशब्दानां रूपाणि त्रिषु लिङ्गेषु पृथक्-पृथक् चलन्ति परन्तु पञ्चतः आरभ्य सर्वेषां सङ्ख्या-वाचकशब्दानां रूपाणि त्रिषु लिङ्गेषु समानरूपेण चलन्ति।
- **यथा** – एकशब्दस्य रूपाणि (पुं० एकः, स्त्री-एका, नपुं०-एकम्) एकवचने भवन्ति। द्विशब्दस्य रूपाणि (द्वौ / द्वे / द्वे) द्विवचने भवन्ति। त्रिशब्दस्य रूपाणि (त्रयः / तिस्रः / त्रीणि) बहुवचने भवन्ति। पञ्चन्-आदिशब्दानां त्रिषु लिङ्गेषु रूपाणि समानानि एव भवन्ति।

**(ख) प्रदत्तम् अनुच्छेदम् आश्रित्य अधोलिखितवाक्येषु रिक्तस्थानानां पूर्तिम् उचितसङ्ख्यापदैः कुरुत –**

1. मम विद्यालयः .................. आदर्शः विद्यालयः अस्ति।
2. अस्मिन् विद्यालये .................. प्रमुखं प्रवेशद्वारम् अस्ति।
3. .................. सहायकानि द्वाराणि सन्ति।
4. .................. द्वाराणि केवलं छात्राणां गमनागमनकाले एव अनावृतानि भवन्ति।
5. अत्र .................. विज्ञानप्रयोगशालाः सन्ति।
6. विद्यालये .................. सङ्गणकप्रयोगशाला अस्ति।
7. भाषाणाम् अपि .................. विभागाः सन्ति।
8. कतिपयासु कक्षासु .................. अनुभागाः, कतिपयासु च .................. अनुभागाः सन्ति।
9. समस्तप्रयोगशालानां सङ्ख्या .................. अस्ति।
10. प्रधानाचार्यस्य .................. सहायकौ उपप्रधानाचार्यौ स्तः।

**(ग) वार्तालापः**

**हर्षवर्द्धनः** – अहो कीदृशं रमणीयम् उद्यानम्?

**यशोवर्द्धनः** – बाढम्, अतिशोभनम्।

**हर्षवर्द्धनः** – अत्र तु आम्रवृक्षाः अपि सन्ति। अहं तान् गणितवान्। अस्मिन् उपवने विंशतिः आम्रवृक्षाः सन्ति। किं त्वया गणिताः?

**यशोवर्द्धनः** – मया आम्रवृक्षाः नैव गणिताः परन्तु निम्बवृक्षाणां गणना कृता। तेषां सङ्ख्या पञ्चविंशतिः अस्ति।

**हर्षवर्द्धनः** – त्वम् उद्यानं परितः परिभ्रम्य मह्यं निवेदय, अत्र कति अशोकवृक्षाः सन्ति?

**यशोवर्द्धनः** – श्रीमन्! अत्र पञ्चाशत् अशोकवृक्षाः सन्ति।

**हर्षवर्द्धनः** – अहो एषः सुगन्धः कुतः आयाति?

**यशोवर्द्धनः** – सुगन्धस्तु मयापि अनुभूयते।

**हर्षवर्द्धनः** – पश्य, उद्यानस्य पूर्वभागे एका पुष्पवाटिका विद्यते, ततः एव समायाति सुगन्धः।

**यशोवर्द्धनः** – तत्र चलित्वा पश्यावः। अत्र तु शताधिकाः पाटलपादपाः सन्ति। अहं पाटलपुष्पाणि गणयामि। अस्यां

वाटिकायां चत्वारिंशत् विकसितानि, पञ्चत्रिंशत् च अर्द्धविकसितानि कुसुमानि सन्ति।

**हर्षवर्द्धनः** – मित्र! यावत् त्वया पाटलपुष्पाणि गणितानि तावत् मया जपाकुसुमानि गणितानि। अत्र चतु:पञ्चाशत् जपाकुसुमानि वर्तन्ते, येषां सुगन्धः सर्वत्र प्रसरति, वातावरणं सुरभितं सुरम्यं च करोति।

**(घ) उपरिप्रदत्तवार्तालापात् सङ्ख्यावाचकानि पदानि चित्वा लिखत –**

**यथा** – विशंतिः

1. ...............................
2. ...............................
3. ...............................
4. ...............................
5. ...............................
6. ...............................
7. ...............................

### नियमनिर्धारणम्

**एकोनविंशतिः सङ्ख्यातः प्रारभ्य नव-नवतिः पर्यन्ताः सङ्ख्यावाचकशब्दाः एकवचनान्ताः नित्यस्त्रीलिङ्गाः च भवन्ति। एतेषां रूपाणि 'मति' शब्दवत् भवन्ति। त्रिंशत्, चत्वारिंशत्, पञ्चाशत् शब्दानां रूपाणि 'सरित्' शब्दवत् भवन्ति। षष्टिः, सप्ततिः, अशीतिः, नवतिः, एतेषां शब्दानां रूपाणि 'विंशतिवत्' भवन्ति।**

**(ङ) उपरि-प्रदत्तं वार्तालापम् आधृत्य अङ्कान् दृष्ट्वा रिक्तस्थानानि सङ्ख्यावाचकैः पदैः पूरयत –**

1. अस्मिन् उपवने (20) .................. आम्रवृक्षाः सन्ति।
2. उद्याने (50) .................. अशोकवृक्षाः सन्ति।
3. वाटिकायां (40) .................. विकसितानि च अर्द्धविकसितानि कुसुमानि सन्ति।
4. वाटिकायां (54) .................. गन्धकुसुमानि सन्ति।
5. उद्याने (25) .................. निम्बवृक्षाः सन्ति।